# छायावतीम्

## रागम्: छायावति ताळम्: आदि

### श्री मुत्तुस्वामि दीक्षित विरचिता

पल्लवि

छायावतीमानन्दवल्लीं
चारुतर तञ्जपुरीश्वरीं भजेऽहम्

समष्टिचरणम्

मायामयविश्वोत्पत्तिकरीं
मारजनकसोदरीं सुन्दरीम्

मध्यमकाल साहित्यम्

कायिकवाचिकमानसत्रिविध-
करणोपासितगुरुगुहजननीम्

◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇